Shodhshauryam, International Scientific Refereed Research Journal
Available online at : www.shisrrj.com
OPEN ACCESS
© 2023 SHISRRJ | Volume 6 | Issue 6
ISSN : 2581-6306
doi : https://doi.org/10.32628/SHISRRJ



# व्याकरणसिद्धान्तसुधानिधौ तद्धिताः इति सूत्रसमीक्षणम्

मनीषा साहू
शोधच्छात्रा, व्याकरणविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**Article Info**
**Publication Issue :**
November-December-2023
Volume 6, Issue 6
**Page Number :** 88-97
**Article History**
Received : 15 Dec 2023
Published : 30 Dec 2023

**सारांशः-** स्वकृतौ स्फुटरूपेण नामोल्लेखपूर्वकं वा तद्धितनामधेयानां प्रत्ययानां वर्गीकरणं पाणिनिना न प्रदर्शितम्। तद्धिताः इति सूत्राधिकारे पञ्चमाध्यायपर्यन्तम् आगतानां प्रत्ययानां तद्धितपदवाच्यं भवेत्। सिद्धान्तसुधानिधिकारेण अत्र बहवः विचाराः प्रदर्शिताः। अतः मया व्याकरणसिद्धान्तसुधानिधौ तद्धिताः इति सूत्रसमीक्षणम् इति शीर्षकमाश्रित्य शोधशेखः विलिखितः।

**विशेषशब्दाः-** तद्धिताः,अस्वार्थिकतद्धिताः,स्वार्थिकतद्धिताः, अत्यन्तस्वार्थिकतद्धिताः, लक्ष्यैकचक्षुष्कः, लक्षणैकचक्षुष्काः, राज्ञी इत्यादयः।

तद्धिताः इति एकपदात्मकंमिदं सूत्रम्। अधिकारसूत्रमिदम्आपञ्चमाध्यायपरिसमाप्तेरयमधिकारः .। स्ववैशिष्ट्यमाधारीकृत्यैव टीकाकाराः तेषां प्रत्ययानां त्रिषु विभागेषु विभाजनं चक्रुः। यथा – अस्वार्थिकतद्धिताः, स्वार्थिकतद्धिताः, अत्यन्तस्वार्थिकतद्धिताः चेति। समस्तप्रकृतिभ्यः विहिताः समासान्ताः अत्यन्तस्वार्थिकप्रत्ययाः, असमस्तप्रकृतिभ्यः विहिताः समासान्ताः अत्यन्तस्वार्थिकप्रत्ययाः भवन्ति।

**अस्वार्थिकतद्धिताः** – अर्थविशेषे सुबन्तप्रकृतेभ्यः यद्विधीयते तदेव अस्वार्थिकतद्धितः। 'तस्यापत्यम्', 'तस्य गोत्रापत्यम्', 'तस्य युवापत्यम्', 'तेन रक्तं रागात्' इत्यादिषु अर्थेषु विहिताः अणादयः तु उपर्युक्तविधतद्धितस्योदाहरणम्। प्रत्ययोऽयं सौविध्यदृष्ट्यानुसारेण अस्वार्थिकसंज्ञया अभिधीयते। 'समर्थानां प्रथमाद्वा'[1] इत्यधिकारे नियम्यते। तद्विषये विषयत्रयं ध्यातव्यम् – प्रथमंतु समर्थार्थे प्रथमादेव भवति, द्वितीयं तु विकल्पेन भवति, तृतीयं तु सुबन्ताद् भवति। प्रत्ययानां स्वार्थः अस्ति। अतः प्रकृत्या सह सम्बन्धे सति अयं परार्थाभिधानत्वम् अनुजुजोषति। अतः अनिवार्यरूपेण अयं तु सुबन्तप्रकृतिभ्यः विधीयते। 'तस्यापत्यम्', 'तेन रक्तं रागात्', 'तत्र भवः' इत्यादिषु सूत्रैः समर्थात् 'तस्य' इति प्रथमान्तात् प्रातिपदिकाद् उक्तानां प्रत्ययानां विधानं भवति। तद्धितप्रत्ययः यस्मिन्नर्थे विधीयते, सोऽयमर्थः प्रत्ययातिरिक्ते अपि सिद्ध्यते, अतः विकल्पे भवति[2]। तथ्यमिदं उपर्युक्ते सूत्रे[3] 'वा' इति पदेन प्रदत्तमस्ति। अनेकसमर्थाभावहेतोः स्वार्थिकतद्धितेन सह 'समर्थानां

[1] अष्टा. – 4/1/82

[2] (क) लाक्षणवाक्यानि 'तस्यापत्यम्', 'तेन रक्तं रागात्', 'तत्र भवः' इत्येवमादीनि भविष्यन्ति। तेषु वेदितव्यम्। वाक्यमपि यथा स्यात् उपगोरपत्यमिति का. – 4/1/92।

(ख) अत एव प्रागदिश इत्युत्तरं नास्य सम्बन्धः। तेषां स्वार्थिकत्वेन अनेकसमर्थाभावात्। वृ.श.शे. – 4/1/82।

[3] अष्टा. – 4/1/82।

**Copyright © 2023 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)** which permits unrestricted use, distribution, and reproduction in any medium for non-commercial use provided the original author and source are credited.

प्रथमाद्वा' इति न संगच्छति[4]। केवलं तदेकदेशभूतं 'वा' इति पदं स्वार्थिकप्रत्ययविधायकसूत्रे अधिकृतं सत् विकल्पत्वेन भवति इति द्योत्यते[5]। यथा – 'दशरस्यापत्यं दाशरथिः' इत्यत्र 'तस्यापत्यम्' इत्यस्मिन्नर्थे 'अत इञ्' इत्यनेन सूत्रेण इञ्प्रत्ययः विधीयते। 'तस्यापत्यम्' इत्यत्र 'तस्यापत्यम्' इति समर्थोऽस्ति। अतः नियमानुकूलं 'तस्य' इति पदेन निर्दिष्टाद् 'दशरथस्य' इति षष्ठ्यन्तात् अपत्यार्थे इञ्प्रत्ययः विधीयते। विकल्पेन उक्तप्रत्ययस्य विधानत्वात् 'दाशरथिः' इत्यस्य वैकल्पिकरूपं 'दशरथस्य अपत्यम्' इति भवेत्। यत्र अस्वार्थिकतद्धिताः नियतरूपेण विकल्पे भवन्ति, तत्र स्वार्थिकप्रत्ययाः ऐकान्तिकरूपेण विकल्पे न भवन्ति। अतः तत्र विकल्पोऽपि अस्वार्थिकवत् न व्यवस्थितमस्ति[6]।

स्वार्थिकप्रत्ययेषु 'समर्थानां प्रथमाद्वा' इत्यस्य प्रश्नः नोदेति। यतो हि अस्वार्थिकवत् स्वतन्त्रार्थस्य अभिधानं न करोति, प्रकृत्यर्थस्य द्योतनं करोति [7] । यथा – 'अयमेषामतिशयेन सुन्दरः सुन्दरतमः' इत्यत्र तमप्प्रत्ययः [8] तुलनात्मकप्रकर्षार्थस्य द्योतकरेव। तस्य वाचकः प्रकर्षार्थः प्रकृत्यर्थस्य विशेषणमस्ति[9], न तु प्रत्ययार्थस्य। अतएव स्वार्थिके प्रकृति-प्रत्यययोः अभावे समर्थप्रश्नो नोदेति।

अस्वार्थिकप्रत्ययाः नियतरूपेण सुबन्तादेव विधीयन्ते, यस्य निर्देशस्तु प्रत्ययविधायकसूत्रघटितैः तस्य, तेन, तत्र, प्रभृतिभिः पदैः कृतः। स्वार्थिके अपि नियमोऽयं निश्चितरूपेण प्रचलितोऽस्ति। तसिल्, तल्, अस्ताति, अतसुच्, त्रा इत्यादयः प्रत्ययाः निर्दिष्टाः सन्ति। एतेषां सुबन्तप्रकृतीनां स्पष्टनिर्देशस्तु 'तत्' इति प्रत्ययविधायकसूत्रे विहितोऽस्ति। स्वार्थिकप्रत्ययाः प्रातिपदिकात् भवन्ति, न तु सुबन्तप्रकृतेः[10]। कारणमिदं वर्तते यत् अस्य स्वकीयार्थो नास्ति तथा अनेन प्रकृत्यर्थः न द्योत्यते। पर्यायनिर्माणमेव अस्य उद्देश्यमिति प्रतिभाति। अपि च वैयाकरणाः शब्दप्रयोगानुगामिनः सन्ति। तथा लोके अत्यन्तस्वार्थिकविशिष्टानां शब्दानां व्यवहारः परिलक्ष्यते। एतदर्थं वैयाकरणानां कृते तादृशशब्दानामन्वाख्यानमनिवार्यरूपेण प्रस्तुतम्। यथा – 'देव एव देवता', 'औषधिरेव औषधम्', 'प्रज्ञ एव प्राज्ञः' इत्यादिषु उदाहरणेषु क्रमेण तल्, अण् इति प्रत्ययौ अत्यन्तस्वार्थिकौ वर्तेते। अस्य पर्यायनिर्माणं विहाय अतिरिक्तः कश्चित् उपयोगः न परिलक्ष्यते। देवदेवतयोः, औषध्यौषधयोः, प्रज्ञप्राज्ञयोः मध्ये कश्चिद् अर्थमूलकभेदः नास्ति। तथापि देवतादिशब्दव्यवहारः लोके तु प्रचलितत्वात् वैयाकरणैः तादृशेषु शब्देषु प्रकृतिप्रत्यययोः काल्पनिकविभागः अनुशासितव्यः। अयं समासान्तसंज्ञकः तु अत्यन्तस्वार्थिकानां कल्पनानायमुद्भावनीयः।

अष्टाध्याय्याः चतुर्थाध्यायस्य प्रथमपादस्य 'यूनस्तिः'(4/1/77) इति सूत्रारभ्य पञ्चमाध्ययस्य द्वितीयपादपर्यन्तम् अस्वार्थिकप्रत्ययानामन्वाख्यानमस्ति। पञ्चमाध्यायस्य तृतीयचतुर्थपादयोः स्वार्थिक-अत्यन्तस्वार्थिकानां विवरणं

---

[4] (क) स्वार्थिकेषु ह्यस्योपयोगो नास्ति। का. – 4/1/82।

(ख) अत एव प्राग्दिश इत्युत्तरं नास्य सम्बन्धः। तेषां स्वार्थिकत्वेनानकसमर्थाभावात्। बृ.श.शे. – 4/1/82।

[5] वावचनामनुवर्त्तत एव, तेन विकल्पे तसिलाक्ष्यो भवन्ति। का. – 4/1/82।

[6] (क) विकल्पोऽपि तत्रानवस्थितः। केचिन्नित्यमेव भवन्ति। का. – 4/1/82।

(ख) अन्येऽपि स्वार्थिकाः प्रत्ययाः नित्याः स्मर्यन्ते – तमवादयः प्राक्कनः, ज्यादयः प्राग्वुन आमादयः प्राङ्मयटः, बृहती जात्यन्ताः समासानताश्चेति। का. – 5/4/7।

[7] स्वीयार्थ प्रकृतेरर्थ भवा स्वार्थिकाः तसिलादवर्थ निर्देस विरहता. अतिशायने 'कुत्सिते' इत्यादीनां च प्रकृत्यर्थाविशेषणत्वादिति भावः। बृ.श.शे. – 5/3/1।

[8] अष्टा. – 5/3/35।

[9] प्रकृत्यर्थविशेषणं चैत्। का. – 5/3/55।

[10] अत्यन्तस्वार्थिकानां सुबुत्पत्तेः प्रागेवोत्पत्तेः। ल.श.शे. तथा उ. – 4/1/48।

प्रस्तुतमस्ति[11]। किन्तु अस्य इदं तात्पर्यं नासीत् यत् पञ्चमाध्यायस्य तृतीयचतुर्थपादयोः ऐकान्तिकरूपेण स्वार्थिकानां विवरणमस्ति, तत्पूर्वं केवलमस्वार्थिकानामेव उपन्यासः कृतः वर्तते। इदमपि परिलक्ष्यते यत् चतुर्थपञ्चमाध्ययोः आद्यपादद्वये बहवः स्वार्थिकप्रत्ययाः पठिताः सन्ति। तथापि स्वार्थिकेषु बहवः अस्वार्थिकाः अपि अनुशासिताः वर्तन्ते। यथा – **'छदिरुपधिबलेर्ढञ्'**[12] **इति सूत्रेण** चतुर्थीसमर्थात् विकृतिवाचकेभ्यः 'छदिष्', 'उपधि', 'बलि' एतेभ्यः शब्देभ्यः कारणभूतां प्रकृतिं निर्देशयितुम् ढञ्प्रत्ययः भवति[13]–। उपधिः नाम रथस्य चक्रम् तथा ढञ्प्रत्ययान्त औषधेयशब्दः तदर्थस्य वाचकोऽस्ति। 'नक्षत्राद् घः'[14] इत्यनेन विहितः घप्रत्ययः अस्वार्थिकप्रकरणस्थः चेदपि स्वयं स्वार्थिकोऽस्ति। नक्षत्र–नक्षत्रियौ इति द्वौ अविशेषप्रयोगौ स्तः। 'सर्वदेवात्तातिल्'[15] इत्यनेन विहितः तातिल्प्रत्ययः तस्मिन्नेव क्रमे पठ्यते, किन्तु स्वार्थिकः। सर्वदेवयोः समानार्थः क्रमेण सर्वतातिः देवतातिश्चेति। एवञ्च पञ्चमाध्यायस्य द्वितीयपादवर्तिनः ना, नाञ्[16], शालच्, शकटच्[17], खः[18] इत्यादयः प्रत्ययाः स्वार्थिकाः सन्ति। एते तु अस्वार्थिकप्रत्ययानाम् अन्वाख्यानक्रमे उपन्यस्ताः भवन्ति। एतदतिरिच्य त्यकन्[19], कन्[20] इत्यादयः प्रत्ययाः अस्वार्थिकेषु अनुशास्ताः सन्ति। पञ्चमाध्यायस्य अन्तिमपादयोः परिगणितास्वार्थिकप्रत्ययापेक्षया उपर्युक्तस्वार्थिकप्रत्ययेषु काचित् विशेषता न परिलक्ष्यते तथा एतेषां पृथग्विन्यासः अनुसन्धेयः।

स्वार्थिकप्रत्ययानामन्वाख्यानक्रमे विहितयोः जातीयर्–छप्रत्यययोः वाचकत्वं प्रमाणिकृत्य नागेशभट्टेन एतौ अस्वार्थिकौ इति प्रतिपादितौ। अतः तेन 'अर्थ स्वार्थिकाः' इति स्थले 'अथ प्रायेण स्वार्थिकाः' इति प्रतिपादितम्।

अष्टाध्याय्यां विषयानां क्रमिकोपन्यासः परिलक्ष्यते। एतादृशौ स्थले अस्वार्थिकेषु स्वार्थिकदर्शनं तथा स्वार्थिकेषु अस्वार्थिकदर्शनम् आचार्यशैलीविरुद्धमिति प्रतीयते। उपर्युक्तयोः जातीयर्–छप्रत्ययोः वाचकत्वं तु केवलं नागेशसम्मतत्वात् अस्वार्थिकत्वमिति सन्दिग्धं भवति। किन्तु ढञ्–घ–ना–नाञ्–तातिल्–शालचाजनां प्रत्ययानां स्वार्थिकत्वं तु असन्दिग्धमस्ति। अस्यां परिस्थित्याम् अस्वार्थिकेषु तस्यान्वाख्यानहेतोः तज्जातीयप्रत्ययैः तस्य सादृश्यं स्यात् यदितरस्वार्थिकप्रकरणपठितस्वार्थिकेषु नास्ति। अपि च, अष्टाध्याय्याः विषये क्रमबद्धविवरणे आचार्यैः यादृशी सावधानता प्रदर्शिता, तादृशः प्रकरणस्य क्रमबद्धतायां सकारणविपर्यासः अवश्यमेव परिलक्षितः। संज्ञाप्रकरणं परिभाषाप्रकरणं च विहाय अन्यत्र सञ्ज्ञापरिभाषयोः उपन्यासः अस्य पुष्टिं सम्पादयति। अतः अस्वार्थिकप्रकरणे स्वार्थिकप्रत्ययानामनुशासनं न दोषायेति।

---

[11] इतः परं स्वार्थिका प्रत्ययाः। का. – 5/3/1।

[12] अष्टा. – 5/1/13।

[13] उपधिशब्दात् स्वार्थे प्रत्ययः। उपधीयत इत्युपधिः रथांगम्। औषधेयमपि, तदेव दारु का. – 5/1/13। एकेनैव सूत्रेण छदिबल्यादिप्रकृतिभ्यः विहितः ढञ्प्रत्ययः अस्वार्थिकोऽस्ति। तत्र उपधिशब्दाद् विहितः प्रत्ययः स्वार्थिकोऽस्ति। यतो हि व्याकरणं लोकव्यवहारानुगुणमस्ति। लौकिकशब्दस्तु व्याकरणानुगामी नास्ति।

[14] अष्टा. – 4/4/141।

[15] का. – 4/4/141।

[16] अष्टा. – 4/4/142।

[17] का. – 5/2/27।

[18] का. – 5/2/22।

[19] गोष्ठशब्दात् भूतपूर्वोपाधिकात् स्वार्थे खप्रत्ययो भवति – का. – 5/2/18।

[20] अष्टा. – 5/2/34।

स्वार्थिक-अत्यन्तस्वार्थिकयोः उभयोः प्रत्ययोः अनुशासनं तु आचार्यैः मिश्रितरूपेण विहितम्। सौविध्यानुकूलं अस्य भिन्ना भिन्ना तालिका अपेक्ष्यते। यथा –यावत् समासान्तप्रत्ययाः अत्यन्तस्वार्थिकाः भवन्ति। यस्य विवरणं तु (5.4.68) इत्यतः (5.4.160) इति पर्यन्तं वर्तते। न तु एतेषां स्वकीयार्थः वर्तते नापि एते प्रकृतिविशेषार्थं द्योतयति। एतादृशानाम् अत्यन्तस्वार्थिकतद्धितप्रत्ययानां भेदद्वयं परिलक्ष्यते। यथा – असमस्तप्रकृतिभ्यः विहिताः, समस्तप्रकृतिभ्यः विहिताः चेति।

प्रथमश्रेण्यां तु तल्[21], क्तिन्[22] इत्यादयः प्रत्ययाः संस्थाप्यन्ते। एते तु देव-मृदादिभ्यः असमस्तप्रकृतिभ्यः भवन्ति। द्वितीयश्रेण्यां तु तादृशाः समासान्तप्रत्ययाः परिगणिताः भवन्ति ये समस्तप्रकृतिभ्यः विधीयन्ते तथा समासान्ताः[23] इत्यधिकारे पठ्यन्ते। अत्यन्तस्वार्थिकप्रत्ययानां प्रकृतिगतभेदकारणात् तेषामन्वाख्यानमपि पृथग्रूपेण क्रियते। न चेत् सर्वेषां विवरणं क्रमबद्धरूपेणैव अपेक्ष्यते। समासान्ताधिकारे पठितप्रत्ययान् अभिलक्ष्यैव वैयाकरणशिरोमणिः नागेशः प्राह यत् – "अत्यन्तस्वार्थिकानां सुबुत्पत्तेः प्रागेवप्रवृत्तिः" इति। किन्तु प्राग् समासान्ताधिकाराद् आकिनिच्, तल्, तिकन् इत्यादयः स्वार्थिकप्रत्ययाः अपि पठ्यन्ते। तदा एतेषां प्रवृत्तिस्तु प्रातिपदिकादेव भवति।

यथा पूर्वमुक्तं स्वार्थिकप्रत्ययाः प्रकृत्यर्थान्नेव द्योतयन्ति न तु वाचकत्वेन। ज्ञातस्य प्रकृत्यर्थस्यैव द्योतनं करोतीति नैव चिन्तनीयम्। अज्ञातप्रकृत्यर्थमपि द्योतयन्ति इत्यपि भाव्यम्। प्रत्ययं विना प्रकृत्यर्थस्य द्योतनं कदापि न सम्भवति। अत एव प्रकृतिप्रत्यययोः सम्बन्धस्तु अनिवार्यः, न तु ऐच्छिकः। यथा – अश्वकः, अज्ञातो गर्दभः इति प्रयोगस्थले अश्व-गर्दभशब्दयोः प्रयोगस्तु अज्ञातोऽश्वः, अज्ञातो गर्दभः इत्यनयोः अर्थयोः यथाक्रमं प्रयुक्तोऽस्ति। यस्य द्योतनं तु स्वार्थिककप्रत्ययः सम्पादयति। प्रत्ययरहिते अश्वशब्दे गर्दभशब्दे अज्ञातत्वस्य द्योतनशक्तिः नास्त्येव। केवलं अश्वत्वस्य गर्दभत्वस्यैव द्योतनकरणे सक्षमोऽस्ति[24]। स्वार्थिकप्रत्ययास्तु जातिरूपार्थस्य द्योतनं न कुर्वन्ति, यतो हि प्रतीतप्रत्यायने अनवस्थादोषः अनिवार्यरूपेण सम्भवति [25] । अतः अज्ञातार्थद्योतनमेव स्वार्थिकानां प्रयोजनमिति अभिमन्यते। प्रकृत्यर्थद्योतकतारूपवैशिष्ट्यहेतुत्वात् अस्वार्थिकप्रत्ययवत् सुबन्तेभ्यः विहिताः सन्ति।

स्वार्थिकप्रत्ययानामन्वर्थतां मनसि निधाय प्रकृत्यर्थद्योतकतायाः उदाहरणपुरस्सरं विवेचनं परमावश्यकमस्ति। 'अल्पं तैलं तैलकम्' इति प्रयोगस्थले तैलशब्दान्तकप्रत्ययः[26] तैलरूपप्रकृतेः अर्थविशेषम् अल्पत्वं द्योतयति। अर्थात् तैलकम् इत्यत्र कप्रत्ययं विना प्रकृत्यर्थविशेषस्य द्योतनं न सम्भवति, एतदर्थं तैलरूपप्रकृत्या सह कप्रत्ययस्य संयोगः अनिवार्योऽस्ति। 'अल्पं तैलम्' इत्यनेन यदर्थबोधो भवति तस्य 'तैलकम्' इत्यनेनापि संभवति। 'ह्रस्वो वृक्षो वृक्षकः' इत्यत्र वृक्षशब्दात् विहितकप्रत्ययः वृक्षशब्दस्य ह्रस्वत्वविशिष्टार्थं प्रतिपादयति। 'ह्रस्वा कुटी कुटीरः' इत्यत्र प्रयुक्तः रप्रत्ययः[27] कुटीरूपप्रकृतेः ह्रस्वत्वविशिष्टार्थवर्तमानत्वं द्योतयति। 'शाखा इव शाक्यः', 'मुखमिव मुक्यः' इत्यत्र प्रयुक्तः यत्प्रत्ययः क्रमेण इवार्थविशिष्टशाखां तथा इवार्थविशिष्टमुखं द्योतयति।[28]

---

[21] अष्टा. – 5/4/27

[22] अष्टा. – 5/4/39

[23] अष्टा. – 5/4/68

[24] अश्वादयश्च जातिविशिष्टमेवार्थ कप्रत्ययरहिता प्रतिपादयन्तीति भावः। तत्र कुत्सादिविशिष्टार्थबोधकताद्यतकः प्रत्यय उचितः। न प्रकृतेः प्रत्ययं विनापि तद्विशिष्टार्थबोधक्तादिति तात्पर्यम्। – उ. – 5/3/74

[25] प्रतीतप्रत्ययनेऽनवस्थाप्रसंगात् – प्रदीप – 5/3/74

[26] अष्टा. – 5/3/85

[27] अष्टा. – 5/6/88

[28] प्रकृत्यर्थविशेषणं च स्वार्थिकानां द्योत्यं भवति। – का. – 5/3/55

**अत्यन्तस्वार्थिकतद्धितः-** पूर्वोल्लिखिताः अत्यन्तस्वार्थिकप्रत्ययाः प्रकत्यर्थविशेषस्य द्योतकाः न भवन्ति। तदुपयोगस्तु शब्दान्तराणां पर्यायवाचकशब्दानां च निर्माणमात्रमेव प्रतीयते। उदाहरणत्वेन समस्तासमस्तप्रकृतिभ्यः विहिताः प्रत्ययाः स्वीकर्तुं शक्यन्ते। ओषधिरेव औषधम्(औषधि + अण्), भेषजमेव भैषज्यम्, अविरेव अविकः(अवि + क),यावएव यावकः(याव + कन्) इति उदाहरणेषु अण्, ज्य, क, कन् इत्यादयः प्रत्ययाः क्रमेण ओषधि, भेषज, अवि, याव इत्यादिभिः प्रकृतिभिः संयुज्य प्रकृत्यर्थविशेषस्य द्योतनं न कुर्वन्ति। यतो हि तत्र प्रकृतयः विशेषार्थे समवेताः न सन्ति। क्रमशः ओषधि, भेषज, अवि, याव इति एतेषां पर्यायवाचकानां औषधां, भैषज्यम्, अविकः, यावकः शब्दानां निर्माणमात्रमेतेषां प्रत्ययानां सहायता वर्तते। अतः इमे प्रत्ययाः विकल्पत्वेन विधीयन्ते न तु नित्यत्वेन। केचन स्वार्थिकप्रत्ययाः नित्याः अपि सन्ति।[29] 'बृहती' इति शब्दात् कन्प्रत्ययविधानेन 'बृहतिका'[30] इति शब्दः निष्पद्यते यस्यार्थस्तु 'बृहती' इति शब्दान्तरं वर्तते। अस्माद् बृहतीशब्दात् कन्प्रत्ययविधानेन शब्दान्तरं निर्मीयते, न तु पर्यायस्य। बृहत् इत्यस्य स्त्रीलिङ्ग बृहती, किन्तु बृहतिकायाः अर्थस्य तु आच्छादिकेति अस्ति। 'देव एव देवता', 'मृदेव मृत्तिका', 'एक एव एकाकी' इत्येषु उदाहरणेषु स्वार्थिकप्रत्ययानामुपयोगस्तु लौकिकपर्यायनिर्माणार्थमेव। देवः देवता चेति शब्दद्वयं परस्परं पर्यायात्मकम्। तथैव औषध्यौषधे, मृदमृत्तिके, प्रज्ञप्राज्ञौ, विनय-वैनयिकौ, एकः एकाकी चेति। 'बृहती' 'बृहतिका' इत्यनयोः मध्ये तादृशः विषयो नास्ति। उपर्युक्तहेतोः कतिपयस्वार्थिकप्रत्ययानां विधानं नित्यमेव वर्तते।[31]

स्वार्थिकप्रत्ययविधायकसूत्रेषु अर्थनिर्देशः कृतः। अर्थोऽयं प्रकृत्यार्थस्य विशेषणं भवति न तु प्रत्ययार्थविशेषणम्। यथा - 'भूतपूर्वे चरट्', 'अतिशायने तमबिष्ठनौ', 'याप्ये पाशप्' इत्यादिषु सूत्रेषु क्रमेण 'भूतपूर्व', 'अतिशायन', 'याप्य' इत्येतेभ्यः शब्देभ्यः तत्तत्प्रत्ययाः विहिताः। किन्तु अयमर्थः प्रकृतिविशिष्टार्थोऽस्ति, प्रत्ययानां नास्ति। यतो हि स्वार्थिकप्रत्ययानां प्रकृत्यर्थेतरेभ्यः स्वकीयार्थः न विद्यते। अतः तत्सम्बन्धे प्रत्ययार्थविशेषणस्य कोऽपि अर्थः नायाति। किन्तु 'देवदत्तस्य भूतपूर्वो गौः देवदत्तरूप्यः' इत्यत्र 'षष्ठ्या रूप्य च'[32] इति सूत्रेण विहितः रूप्यप्रत्ययः सविशेषणमस्ति। निर्देशोऽयं वृत्तिकारेण स्पष्टतया कृतो वर्तते।[33] किन्तु तथ्यास्य 'षष्ठ्यारूप्य च' इति सूत्रेण विहितेन रूप्यप्रत्ययेन सह सम्बन्धः एव नास्ति। अत्र पूर्वसूत्राद् अनुवृत्तस्य भूतपूर्वशब्दस्य रूप्यप्रत्ययार्थविशेषणार्थमेव, न तु षष्ठ्यन्तप्रकृतेः विशेषणाय।

यथा स्वार्थिकप्रत्ययानामर्थविमर्शः महत्त्वपूर्णोऽस्ति तथैव तेषां लिङ्गविवेचनञ्च। प्रकृत्यर्थद्योतकत्वात् स्वार्थिकप्रत्ययाः प्रकृति-लिङ्ग-वचनानुसारिणः भवेयुः।[34] यथा - 'अल्पं तैलं तैलकम्' इत्यत्र तैलम् इति नपुंसकमस्ति, एतदर्थं स्वार्थिकः कन्प्रत्ययविशिष्टः तैलकमिति शब्दः अपि नपुंसकलिङ्गविशिष्टो भवति। 'ह्रस्वः वृक्षः वृक्षकः' इत्यत्र

---

[29] बृहत्या आच्छादने - पा. - 5/4/6

तुल. - द्वौ प्रावारोत्तरासंगौ समौ बृहतिका तथा।

[30] का. - 5/4/7

[31] अन्येऽपि स्वार्थिकाः नित्याः प्रत्ययाः स्मर्यन्ते, तमवादयः - प्राक्कनः। ज्यादयः प्राग्वुनः। आमादयः। प्राङ्मयटः। बृहती जात्यान्ताः समासान्तश्चेति - का. - 5/4/7

[32] अष्टा. - 5/3/54

[33] षष्ठ्यन्तात् प्रत्ययविधानात् सम्प्रतिः भूतपूर्वग्रहणं प्रत्ययार्थस्य विशेषणं न तु प्रकृत्यर्थ विशेषणम्।

अष्टा. - 5/3/54

[34] स्वार्थिकाः प्रत्ययाः प्रकृतितोलिङ्गवचनान्यनुवर्तन्ते। महा. - 5/3/66-74

वृक्षशब्दः पुंसि वर्तते, अतः स्वार्थिककन्प्रत्ययविशिष्टो वृक्षकशब्दोऽपि पुंसि अस्ति। 'अनुकम्पनीयः पुत्रः पुत्रकः' इत्यत्र पुत्रकशब्दः प्रकृतिभूतपुत्रस्य पुंल्लिङ्गत्वात् पुंसि भवति। अतः 'कुत्सितोऽश्व अश्वकः', 'अज्ञातोऽश्व अश्वकः' इत्यत्र स्वार्थिकप्रत्ययः तत्तत्प्रकृतेः लिङ्गवचनानुसारं भवेत्। एतदर्थं लिङ्गवचनसम्बन्धे उपर्युक्तस्थापना यथार्थभूता इति प्रतीयते। यत्र जातिवाचकानां संज्ञावाचकानां च स्वार्थिकप्रत्ययविशिष्टशब्दानां लिङ्गवचनयोः विषये प्रश्नः आयाति, तत्र प्रायः प्रकृत्यनुसारमेव भवति। अतः 'बहुगुडो द्राक्षा', 'वृषभकल्प इयं गौः' इति उदाहरणानि सिद्धानि भवन्ति। किन्तु विशेषणशब्दानां गुणवाचकशब्दानां सम्बन्धे स्वार्थिकप्रत्ययाः प्रकृतेः लिङ्गानुवचनं अनुसरन्तीति स्थापना नाङ्गीक्रियते। 'कुशाग्रमिव कुशाग्रीया[35] बुद्धिः', 'कुशाग्रीयं वस्त्रम्' इति स्थले कुशाग्रशब्दनिर्मितः कुशाग्रीयशब्दः(कुशाग्र + छः)[36] नुपुंसकं न भूत्वा बुद्धिशब्दस्य विशेषणत्वेन स्त्रियां भवति, तथैव वस्त्रशब्दस्य विशेषणत्वेन नपुंसकलिङ्गमपि भवति। 'शाखा इव शाख्यः'(शाखा + यत्)[37], 'मुखमिव मुख्यः'(मुख + यत्) इति स्थले यत्प्रत्ययविधानं तु प्रकृतेः लिङ्गवचनानुसरं भवति। अतः निष्कर्षोऽयमायाति यत् स्वार्थिकप्रत्ययेन निर्मिताः विशेषणशब्दाः विशेष्यस्य लिङ्गवचनानुसारं भवन्ति, ते प्रकृतेः लिङ्गवचनानुगमनं न कुर्वन्ति। जातिवाचकशब्देष्वपि प्रकृतेः लिङ्गवचनानाम् अनुल्लङ्घ्यमानाः स्वार्थिकप्रत्ययाः परिदृश्यन्ते। यता –'ह्रस्वाकुटी कुटीरः' 'ह्रस्वा शमी शमीरः', 'ह्रस्वा शुण्डा शुण्डारः' इत्यत्र कुटीत्यादेः प्रकृतेः स्त्रीलिङ्गत्वात् अपि ततः निर्मितः स्वार्थिकप्रत्ययनिष्ठः कुटीरशब्दः स्त्रियामभूत्वा पुंसि भवति।[38] तथैव 'ह्रस्वा कुतूः[39] कुतुपम्'(कुतू + डुपच्) इत्यत्र यद्यपि प्रकृतिभूतः कुतूशब्दः स्त्रियां वर्तते, तथापि कुतुपम् इति शब्दः चर्ममयपात्रापेक्षत्वात् नपुंसि[40] भवति। अतः स्वार्थिकप्रत्याः प्रकृतेः लिङ्गवचनमपि अतिक्रामन्ति[41] इति निष्कर्षः। उदाहरणम् – गुडाकल्पदा द्राक्षा[42]।

पाणिनिः लिङ्गं वचनञ्च लोकाश्रयरूपेणाभिमत्वा तत्सम्बन्धे स्वमतं नाभिव्यक्तवान्। 'तदशिष्यं संज्ञाप्रमाणत्वात्'[43] इति सूत्रस्वारस्यत्वात् पाणिनिमतानुसारं लिङ्गं वचनं च लोकाश्रयत्वेनाभिमत्वा वैयाकरणैः तद्विवादेभ्यः तटस्थरूपेण स्थेयमिति निर्देश मिलति। लोककण्ठे व्याप्तशब्दानां लिङ्गं वचनं च वैयाकरणैः न प्रतिपाद्येते, नापि तेषामर्थसम्बन्धश्चेति। यतो हि शब्दादर्थाभिधानं स्वाभाविकमेव[44]। शब्दप्रयोगस्तु व्याकरणाद् पूर्वे विद्यते। अतः तस्य लिङ्गवचनानां लोकाश्रयस्तु स्वाभाविकः एव। एतदर्थं 'प्रधान-प्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्' इति सूत्रे पाणिनिःप्रकृत्यर्थ-प्रत्ययार्थनिर्णयस्य

[35] अष्टा. – 5/2/105

[36] अष्टा. – 5/3/106

[37] अष्टा. – 5/3/88

[38] स्वार्थिकत्वेऽपि पुंल्लिंगतालोकाश्रयत्वाल्लिंगस्य। का. – 5/3/68

[39] अष्टा. – 5/3/89

[40] चर्ममर्थ स्नेहभाजनमुच्यते। का. – 5/3/86

[41] स्वार्थिकाः अतिवर्त्तन्तेऽपि लिंगवचनानि। महा. – 5/4/14

[42] ल.श.शे. – 5/3/67

[43] अष्टा. – 1/2/53

[44] शब्दैरर्थाभिधानंस्वाभाविकं, न पारिभाषिकमशक्यत्त्वात्। का. – 1/2/53

समस्याभ्य: वैयाकरणान् तटस्थरूपेण स्थातुं संकेतितवान्[45]। इदमेव कारणं यत् स्वार्थिकप्रत्यया: एकत्र प्रकृते: लिङ्गं वचनं च अनुसरन्ति तथैव अन्यत्र अतिक्रामन्तीति उपर्युक्तोदाहरणै: नि:सशयं प्रमाणितम्। लौकिके यच्छब्दस्य यल्लिङ्गं, यद्वचनं, यदर्थ: चेति प्रचलितोऽस्ति, वैयाकरणै: तद्विरुद्धानुशासनं कर्तुं नैव शक्यते। शब्दानुसारस्य उद्देश्यं लोकप्रचलनस्य विरोधभूतं न भवति, यतो हि शास्त्रं व्यवस्थापकं, न तु लोकविरोधीभूतम्[46]। यच्छब्द: यद्रूपे प्रचलितोऽस्ति, शब्दशास्त्रं तस्यान्वाख्यानमात्रं तस्मिन्नेव रूपं करोति[47]। 'पृषोदरादीनि यथोपदिष्टम्' सूत्रस्वारस्येन पाणिनिना प्रचलितस्य अनुमोदनभावना स्पष्टतया पर्यलक्ष्यते। आचार्येण निपातनपद्धते: आश्रयणमपि शब्दप्रयोगस्य लोकाश्रयताहेतो: कृतं वर्तते। तथा शब्दसाधुत्वे निपातनप्रक्रिया सर्वथावैज्ञानिकी तथा युक्तिसंगता वर्तते।

स्वार्थिकप्रत्ययानां प्रकृत्यर्थद्योतनकत्वरूपार्थविवेचनेन इदं स्पष्टं भवति यत् पाणिनि: 'यावत्' इति शब्दे अर्थमर्थात् 'सर्वे सर्वार्थवाचका:' इत्यस्य वैयाकरणनिकायप्रसिद्धसिद्धान्तस्य पूर्णसमर्थक: आसीत्। अन्यथा स्वार्थिकप्रत्ययानां प्रकृत्यर्थद्योतकता सर्वथा निराधारस्वरूपा प्रमाणीभूता भवेत्। कैयट: शब्दार्थविषयकं पाणिनीयमतं प्रकारान्तरेण स्पष्टञ्चकार यत्तु पूर्वपाणिनिटीकाकाराणां मतेभ्य: अभिन्नमेव[48]। 'कुत्सित: - अश्व: = अश्वक:' इत्यत्र अश्वशब्द: जातिविशिष्टार्थं प्रतिपादयितुं सक्षमोऽस्ति। कुत्सितादिविशिष्टार्थबोधाय तदर्थद्योतकस्य कप्रत्ययस्य अश्वरूपप्रकृत्या सह संयोगापेक्षता वर्तते। यतो हि विना प्रत्ययं प्रकृतेभ्य: उपर्युक्त: विशिष्टार्थ: न निर्गच्छति। अत: अश्वरूपप्रकृत्या सह कुत्साविशिष्टार्थकस्य कप्रत्ययस्य संयोजनं विहितं वर्तते। प्रकृतिमात्राद् कुत्सादिरूपविशिष्टार्थस्य प्रत्यायनं भवति चेत् तत्र प्रत्ययसंयोगस्य अनिवार्यतैव नास्ति। यतो हि प्रतीतस्य प्रत्यायनार्थं प्रत्यययोगकरणेन अनवस्थाप्रसङ्ग सर्वदैव शङ्कापूर्णो भवति[49]।

'सर्वेसर्वार्थवाचका:' इति सिद्धान्तानुसारं प्रकृत्यर्थविशेषबोधकताया: क्षमता प्रकृतौ सन्निहितास्ति। पुनश्च प्रत्ययसंयोगं विना प्रकृत्यर्थविशेष: निर्गन्तुं न शक्नोति। एतदर्थं प्रत्ययस्य आवश्यकता वर्तते[50]। 'वृक्ष:', 'वृक्षक:'(ह्रस्वोवृक्ष:-वृक्ष + क)[51] इत्यनयो: मध्ये यदि अर्थभेद: न स्यात्, यदि एक: अपरस्य पर्यायमात्रं भवेत् तदा कप्रत्ययस्य संयोग: न करणीय:। अत: स्वार्थिकप्रत्ययसंयोगस्तु प्रकृतिगतविशेषार्थं द्योतनार्थमेव अनिवार्योऽस्ति।

पाणिनिना तद्धितस्य प्रकृतिसम्बन्धं तु स्पष्टतया 'ङ्याप्प्रातिपदिकात्' इति सूत्रे चकार। इदं तु अधिकारसूत्रमस्ति। अस्य व्याप्तिस्तु पञ्चमाध्यायस्य अन्तं यावत् वर्तते। यतो हि तद्धितप्रत्ययानामन्वाख्यानं तु उपर्युक्ताधिकारसूत्रे

---

[45] ताभ्यामर्थवचनमर्थाभिधानमनेन प्रकारेण भवतीति पूर्वाचार्यै: परिभाषितम्। ...त्तपाणि निराचार्य: प्रत्याचष्टे। अशिष्यमेतत्। अर्थस्यान्यप्रमाणत्वात्। अन्य इति शास्त्रापेक्षया लोको व्यवदिश्यते। ख लोकत एवार्थावगते:। ...यश्च लोकतोऽर्थ: सिद्ध: किं तत्र यत्नेन। का. - 1/256

[46] शास्त्रतो हि नाम व्यवस्था। न ह्यव्यवस्थाकारिणा शास्त्रेण भवितव्यम्। महा. - 6/1/135

[47] शब्दप्रमाणका: वयम्। यच्छब्द आह तदस्माकं प्रमाणम्। महा. प्र. आ.

तत्रलिङ्ग वचनं च स्वभावसिद्धं न यत्नप्रतिपाद्यम्। का. - 1/2/53

[48] अनिर्धारितविशेषेऽर्थे यदाप्रकृतिर्वर्त्तते तदा तद्विशेषद्योतनाय स्वार्थिक: प्रत्ययो विधीयते यदातु निर्ज्ञातविशेषे एवार्ते कुत्सितादय: शब्दा: वर्त्तन्ते तदा विशिष्टस्यार्थस्य प्रतीत्तवात् चरितार्थत्वात् प्रत्ययाप्रसंग:। प्रतीतप्रत्यायने अनवस्थाप्रसंगात्। प्रदीप - 5/3/74

[49] अश्वादयश्च जातिविशिष्टार्थ 'क' प्रत्ययरहिता प्रतिपादयन्तीति भाव:। तत्र 'कुत्सा' कुत्साविशिष्टार्थबोधकताद्योतक: प्रत्यय: उचित:, न प्रकृते: प्रत्ययं विनापि तद्धितशिष्टार्थबोधकत्वादिति तात्पर्यम्। उ. - 5/3/74

[50] यथा सर्वेऽपि शब्द: स्वार्थव्यतिरिक्तां स्वार्थादिगता कुत्सामभिधातुं प्रत्ययं लभते - उ. - 5/3/74

[51] अष्टा. - 6/3/86

अन्तर्गतमस्ति। अत: प्रातिपदिकादेव तद्धितस्य उत्पत्ति: सर्वथा सिद्धा वर्तते। किन्तु पाणिण्यध्येतारै: इदं विदितं यत् पाणिने: मन्तव्य न केवलं सूत्रमुखेन अपि तु सूत्रस्वारस्येन ज्ञाप्यते। अत: लक्षणैकचक्षुष्का: अध्येतार: पाणिन्यध्ययने पर्याप्ता: न सन्ति। पाणिणे: यथार्थतात्पर्यमवगन्तुं लक्ष्यैकचक्षुष्क: भवेत्। 'ङ्याप्प्रातिपदिकात्' इति सूत्रं ऐकान्तिकरूपेण तद्धितस्य प्रकृते: निर्णयस्तु न करणीय:। तद्धितसम्ब्धे उपर्युक्तसूत्रस्थस्य 'प्रातिपदिकात्' इति पदस्य लक्ष्यार्थ: सुबन्त: इति। यद्यपि सुबन्ताद् विहितानां प्रत्ययानां, यथा –'पञ्चमस्यास्तसिल्', 'सप्तम्यास्त्रल्' इत्येतेषां स्पष्टतया अन्वाख्यानं आचार्यै: कृतं वर्तते। एतदाधारीकृत्यैव तद्धितप्रत्यया: प्रातिपदिकादेव भवन्तीति निष्कर्ष: आयाति। इदं तु भ्रान्तमेव। 'स्वार्थद्रव्यलिङ्गसंख्याकारक' इत्येवं पञ्चकप्रातिपदिकार्थानामभिव्यक्ते: प्राग् तद्धितप्रत्ययस्य आकांक्षा नैव भवति। यत् किमपि प्रातिपदिकम् उपर्युक्तान् पञ्चविधान् प्रातिपदिकार्थान् अभिव्यक्त्यैव तद्धितप्रत्ययार्थं साकांक्षं भवति। इदमेव स्वाभाविकम्। अनल्पमतय: आचार्या: एतदेव तथ्यं प्रकारान्तेण प्रतिपादितवन्त:। 'अतिशायने तमबिष्ठनौ' तथा 'द्विवचनविभज्योपपदे तरबीयसुनौ' एताभ्यां सूत्राभ्यां यदि क्रमेण प्रातिपदिकात् 'तमप्' तथा 'तरप्' प्रत्ययौ विधीयेते तदा 'घकालतनेषु कालनाम्न:'[52] इति पाणिनीयसूत्रं संगतिपूर्णं संशयपूर्णं भवेत्। पूर्वसूत्रेण घसंज्ञके प्रत्यये, कालशब्दे, तनप्रत्यये च परत: कालनाम्न: सप्तम्या अलुग् भवति। सुबन्तात् तरप्प्रत्ययस्य तमप्प्रत्ययस्य विधानेनैव अस्य सूत्रस्य प्राप्तिर्भवति। अत: 'पूर्वाह्णेतरे' इत्यत्र प्रोक्तसूत्रेण सप्तम्या: अलुग् भवति। प्रातिपदिकाद् तद्धितस्य उत्पत्ति: इति चिन्तनेन सप्तम्या: अलुग्विषयक: प्रश्न: एव नायाति। तरप्, तमप्, तनप् इति प्रत्ययानां परत: एव उपर्युक्तसूत्रेण पूर्वपदस्थसप्तम्या: अलुग्विधानं पाणिना कृतं वर्तते। अत: अयं सिध्यते यत् तद्धितोत्पत्ति: सुबन्तादेव अभीष्टास्ति, न तु प्रातिपदिकात्। इयं स्थापना तु स्वार्थिकास्वार्थिकप्रत्ययानां सम्बन्धे एव मन्तव्या, न तु अत्यन्तस्वार्थिकसम्बन्धे। अस्य युक्तयुक्तं विवेचनं तु यथास्थाने कृतं वर्तते। अत: 'सुबन्तात्तद्धितोत्पत्ति:' इत्यस्य व्याप्तिसीमानिर्धारित्वात् कथनमिदम् अतिवयाप्तिदोषाद् सर्वथैव अस्पष्टं भवति।

अस्वार्थिक-स्वार्थिक-अत्यन्तस्वार्थिकानां स्वरूपं तु यथार्थभूता मीमांसा प्रकृताध्याये उपस्थापितास्ति। वृत्तकारा: वामन–जयादित्याद: 'प्राग्दिशो विभक्ति'[53] इत्यनेन सूत्रेण इदं प्रदर्शितं यत् उपर्युक्तसूत्रान्तराद् प्रत्यया: स्वार्थिका: भवन्ति। दीक्षितेनापि वृत्तिकारान् समर्थितवान्। किन्तु अष्टम–पञ्चमाध्ययो: तृतीयचतुर्थपादयो: विहिता: सर्वे प्रत्यया: स्वार्थिका: न भवन्ति। केचन एवमपि सन्ति ये प्रकृत्यर्थद्योतका: न भूत्वा वाचका: भवन्ति। ते स्वार्थिकप्रत्यया: इति वक्तुं नैव शक्यन्ते। स्वार्थिकास्तु प्रकृत्यर्थविशेषणस्वरूपा: भवन्ति, ये प्रत्यया: प्रकृत्यर्थस्य्च विशेष्यरूपे अन्वाख्याता: भवन्ति ते स्वार्थिका: इति उच्यन्ते। यथा – 'प्रकारवचने थाल्' तथा 'जात्यन्ताच्छबन्धुनि' इति सूत्राभ्यां विविधरूपेषु विहितत्वात् स्वतन्त्रार्थे वाचका: भवन्ति, न तु प्रकृत्यर्थस्य विशेषणम्। समासान्तप्रत्यय: विकल्पेन न भवन्ति, ते तु नित्या:। अस्वार्थिकेभ्य: एव अस्य तथ्यस्य भिन्नता स्पष्टरूपेण पर्यलक्ष्यते।

**प्रश्न**:–वर्तते यत्" तद्धिता:" इत्यधिकार: इति सूत्रात्प्रागेव स्यात् एवं .स्त्रीप्रत्ययानामादितस्तद्धिताधिकारे क्रियमाणे" प्राचां ष्फस्तद्धिता:" (4.1.17 इति सूत्रे (तद्धितग्रहणं न कर्तव्यम्इति सूत्रे ई (6.4.141) यस्येति च .द् ग्रहणाभावेऽपि कार्यसिद्धि भविष्यति, एवं स्त्रीप्रत्ययनामादितस्तद्धिताधिकारे कृते सति लाघवं स्यात् . ङ्याबन्तमपि तद्धितान्तत्वात् प्रातिपदिकमिति" ङ्याप्प्रातिपदिकात्" इत्यत्र ङ्याब्ग्रहणं न कर्तव्यं भवति.

**अत्र समाधानम्**–मैवम् प !ट्वीत्यादावोर्गुणप्रसङ्गात् इति केचित् वदन्तिनाम . स्त्रीप्रत्ययनामादितस्तद्धिताधिकारे क्रियमाणे ङीब्ङीष्ङीन्प्रत्ययानां" लशक्वतद्धिते" इति सूत्रेण ङकारलोपाभाव: . सूत्रे" अतद्धिते" इति प्रतिषेधात्तेन ." पट्वी" इत्यत्र

[52] अष्टा. – 6/3/16

[53] अष्टा. – 5/3/1

पटु +ङीष्इ (ई) त्यत्र " ओर्गुण:" इति सूत्रेण गुण: भविष्यति इति दोष: . तस्मात् दोषवारणाय यथान्यासमेवास्तु टाप: प्राग् तद्धिताधिकार: न कर्तव्यस्पष्टमि .:दं न्यासे, पदमञ्जर्यां च .

**सुधानिधिकारमतम्-** न च प्राचामित्यत्र तद्धितपद0 (ग्रन्थ)" स्त्रीप्रत्ययनामादिस्तद्धिताधिकारे कृते" प्राचां ष्फस्तद्धित:" इति सूत्रे तद्धिताधिकारात् साक्षात्" तद्धित" ग्रहणाभावात् लाघवमिति चेत् तथा न . यतो हि ङीबादि- प्रत्ययानां ङकारस्येत्संज्ञा न स्यात्" लशक्वतद्धिते" इति इत् संज्ञा विधायक सूत्रे" अतद्धिते" इति प्रतिषेधात् . अन्यत्र च" शुनी", " मघोनी" इत्यत्र सम्प्रसारणभावदो-रूप -ष: दृश्यते .श्वन्, मघवन् इति नकारान्तात् प्रातिपदिकात्" ऋन्नेभ्यो ङीप्" (4.1.5) इति सूत्रेण ङीप् प्रत्यये सति -श्वन्ङीप् + इति स्थितौ ङीप्प्रत्ययस्य तद्धिताधिकार पठनात्-" श्वयुवमघोनामतद्धिते" (6.4.133)" इति सूत्रेण संप्रसारणं न स्यात्सूत्रे ." अतद्धित" इति प्रतिषेधात् तेन .इष्टरूपं न सिध्यतीति तु दोष:

**राज्ञी इत्यत्र दोषप्रदर्शनम्** – "राजन् +ङीप्" इति स्थितौ ङीप् प्रत्ययस्य तद्धिताधिकारत्वात्" नस्तद्धिते" (64..100) इति सूत्रेण 'राजन्' शब्दस्य टिलोपश्व स्यादिति एतदपि दोषाय भवति. ङित्प्रत्यये परतत :द्धितकार्यस्यानुपपत्तिरिति नास्ति, एवं सति ' कौसल्य' इत्यत्रापि ञ्यङि इति ङिति प्रत्यये परत :अकारलोप: न स्यात् . 'कोसल' शब्दात्" वृद्धेत्कोसलाजादाञ्ञ्यङ्" (4.1.169इत्यनेन अपत्या (र्थे ञ्यङ् प्रत्यय:, आदिवृद्धौ" कौसल य +" इति स्थितौ" यस्येति च" (6(4.142. सूत्रेण" कौसल" इति भसंज्ञकस्याङ्स्याकारस्य ञ्यङि परत: लोप: इष्यते, परं न स्यात् इति दोष: आयाति यदि ङित् :परत-तद्धितकार्यस्यानुपपत्ति: चिन्तयामश्चेत्.

न च स्त्रियां विहितस्य ङित्त :प्रत्यये परत-द्धितकार्यस्यानुपपत्तिरिति वक्तव्यम् . एवं सति" कौमुदगन्ध्या" इत्यत्रापि" यस्येति च" सूत्रेण इकार लोपस्याभावे अनिष्टरूपं स्यात्अत्र ." अणिञोरनार्षयोर्गुरुपोत्तमयो: ष्यङ्" (4.1.78) इत्यनेन स्त्रियां ष्यङादेश: भवति प्रत्ययस्य स्थानेसूत्रमिदं ." स्त्रियाम्" (4.1.3) इति सूत्रस्याधिकारे वर्तते." समर्थानां प्रथमाद्वा" (4.1.82) इत्येतस्मात् प्राक्" स्त्रियाम्" इत्यधि क्रियते . तेन ज्ञायते स्त्रियां विहितस्य ङित् प्रत्यये परतअपि : तद्धितकार्याणि भवन्तीति तथैव 'राजन् +ङीप्' इत्यत्रापि स्त्रियां ङिति प्रत्यये परत:" नस्तद्धिते" इत्यस्य प्रवृत्तौ अनिष्टरुपापत्ति: इति दोष: . अत: टाप: प्राग् तद्धिताधिकार: मा भूत् इति भाव: .

**समीक्षा-** सूत्रमिदं यथावृत्तिं व्याख्यातम्प्रधानत .या –

1.तद्धिता:" इति बहुवचननिर्देशे विचार .:जात :

2. टाप: प्रागेव तद्धिताधिकारे विचार: कृत: .

**अत्र सुधानिधिकार**: - न च प्राचामित्यत्र तद्धितपदत्यागादेव लाघवमिति वाच्यम्, ङीबादीनां ङकारस्येत्संज्ञानुपपत्तेअत .:द्धित इति प्रतिषेधात् . शुनी मघोनीत्यत्र सम्प्रसारणं न स्यात्तद्धित इति निषेधात् राज्ञीत्यादौ नस्तद्धित इति .टिलोपश्च स्यात्.

न च ङित्प्रत्यये तद्धितकार्याभावस्योक्तरीत्या ज्ञाप्यत्वान्नानुपपत्तिरिति वाच्यम्, कौशल्य इत्यादौ यस्येति चेत्यकारलोपानुपपत्ते वृद्धेदिति :ञ्यङो ङित्वात् . न च ज्ञापकस्य ङित् स्त्रीप्रत्ययमात्रपरतया निर्वाह कौमुदगन्ध्येत्यादाविकारादिलोपानुपपत्ते:, ष्यङस्त्रियामेव विहित : त्वात्. समर्थानामित्यतप्राक् स्त्रियामित्य :स्याधिकृतत्वात् .

**अयमाशय**:- टाप: प्रागेव तद्धिताधिकारे स्त्रीप्रत्ययनामादितस्तद्धिताधिकारात् साक्षात् तद्धिताधिकारात्" प्राचां ष्फस्तद्धिते" इति सूत्रे" तद्धित" इत्येतस्य ग्रहणाभावात् लाघवं भवति .

"लशक्वतद्धिते" इत्यत्र" अतद्धिते" इति प्रतिषेधात् ङीबादि प्रत्यायानां ङकारस्य इत्संज्ञा न - स्यात् इति दोष: आयाति." शूनी", " मधोनी" इत्यत्र तु सम्प्रसारणाभाव: भवतीति दोषान्तर: दृश्यते.

'राज्ञी' इत्यत्र 'राजन् +ङीप्' स्थितौ" नस्तद्धिते"(6.4.144) इत्यनेन टिलोप: प्रसङ्ग:, येनानिष्टरूपापत्तिरिति दोष: .

ङिति परतत :द्धितकार्यं न भवतीत्यपि न, दृश्यते च" कौसल्य:" इत्यत्र ञ्यङि- इति ङिति परत:" यस्येति च" इत्यनेन अकरलोपरूपं कार्यम् . स्त्रियां विहितस्य ङित् :प्रत्यये परत-तद्धितकार्यं न भवतीत्यप्युक्ता" राज्ञी" इत्यत्र पूर्वोक्तं दोषं वारयितुं शक्यते, दृश्यते च" कौमुदगन्ध्या" इत्यत्र स्त्रियां विहित ष्यङि परत:" यस्येति च" इकार लोपरूपकार्य -म्. अन्ततोगत्वा टाप: प्रागेव तद्धिताधिकार: न स्यादिति भाव: तेनैव पूर्वोक्ता: सर्वेऽपि दोषा: .निवारयितुं शक्यतेअत: . स्त्रीप्रत्ययनामादिस्तद्धिताधिकार: न समीचीन:इति भाव:. अन्या रीत्या सूत्रस्यास्य यथामति समीक्षा कृता मया.

**परिशीलितग्रन्थसूची**


1. अष्टाध्यायी पं . ईश्वरचन्द्र:, चौखम्बा पब्लिशर्स्
2. शब्दकौस्तुभ:, चौखम्बा - संस्कृत - सीरीज, वाराणसी
3. व्याकरणसिद्धान्तसुधानिधि:, चौखम्बा संस्कृतसीरीजग्रन्थमाला, वाराणसी
4. व्याकरणसिद्धान्तसुधानिधि:, सत्यप्रकाशदुबे, राजस्थानपत्रिका
5. व्याकरणसिद्धान्तसुधानिधि:, राजस्थानसंस्कृत अकादमी, जयपुर
6. काशिकावृत्ति: न्यासपदमञ्जरीसहिता, डॉ . नारायणमिश्र:, रत्ना पब्लिकेशन्स, वाराणसी
7. काशिकान्यासपदमञ्जरी संस्कृत एवं 'भावबोधिनी 'हिन्दी टीका, डॉ . जयशङ्कर लाल त्रिपाठी, तारा पब्लिकेशन्स, वाराणसी
8. न्यास इत्यपरनामधेया काशिकाविवरणपञ्चिका
9. पदमञ्जरी, आचार्य पुल्लेल रामचन्द्रुडु, संस्कृत अकादमी, उस्मानिया विश्वविद्यालय:, हैदराबाद्
10. महाभाष्यम् प्रदीपोद्योतसहितं छायाटीकोपेतञ्च, चौखम्बा संस्कृतप्रतिष्ठान, वाराणसी
11. महाभाष्यम् प्रदीपोद्योतराजलक्ष्मीटीकासहितम्, गुरुप्रसादसादशास्त्री, प्रतिभा प्रकाशन, नई दिल्ली
12. वैयाकरणभूषणम्, डा . विद्यानिवास मिश्र:, भारतीयविद्याप्रकाशन, वाराणसी
13. वैयाकरणभूषणसार:, चौखम्बा संस्कृतप्रतिष्ठान, वाराणसी
14. व्याकरणशास्त्र का इतिहास - भाग 1, आचार्य युधिष्ठिरमीमांसक: